# अष्ठमः पाठः सूक्तयः

## अभ्यासः

1. एकपदेन उत्तरं लिखत।

(क) पिता पुत्राय बाल्ये किं यच्छति?

(ख) विमूढधीः कीदृशीं वाचं परित्यजति?

(ग) अस्मिन् लोके के एव चक्षुष्मन्तः प्रकीर्तिताः?

(घ) प्राणेभ्योऽपि कः रक्षणीयः?

(ङ) आत्मनः श्रेयः इच्छन् नरः कीदृशं कर्म न कुर्यात्?

(च) वाचि किं भवेत्?

उत्तरः 1

(क) विद्याधनम्। (ख) धर्मप्रदाम्। (ग) विद्वांसः। (घ) सदाचारः। (ङ) अहितम्। (च) अवक्रता।

2. स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत-

**यथा- विमूढधीः** पक्वं फलं परित्यज्य अपक्वं फलं भुङ्क्ते।

कः पक्वं फलं परित्यज्य अपक्वं फलं भुङ्क्ते?

(क) संसारे **विद्वांसः** ज्ञानचक्षुभिः नेत्रवन्तः कथ्यन्ते।

(ख) जनकेन **सुताय** शैशवे विद्याधनं दीयते।

(ग) **तत्त्वार्थस्य** निर्णयः विवेकेन कर्तुं शक्यः।

(घ) धैर्यवान् **लोके** परिभवं न प्राप्नोति।

(ङ) आत्मकल्याणम् इच्छन् नरः **परेषाम्** अनिष्टं न कुर्यात्।

उत्तरः 2

(क) संसारे के ज्ञानचक्षुभिः नेत्रवन्तः कथ्यन्ते?

(ख) जनकेन कस्मै शैशवे विद्याधनं दीयते?

(ग) कस्य निर्णयः विवेकेन कर्तुं शक्यः?

www.ncertsolutionhub.in

(घ) धैर्यवान् कुत्र परिभवं न प्राप्नोति?

(ङ) आत्मकल्याणम् इच्छन् नरः केषाम् अनिष्टं न कुर्यात्?

3. पाठात् चित्वा अधोलिखितानां श्लोकानाम् अन्वयम् उचितपदक्रमेण पूरयत-

(क) पिता .......... बाल्ये महत् विद्याधनं यच्छति, अस्य पिता किं तपः तेपे इत्युक्तिः ..........|

(ख) येन ..... यत् प्रोक्तं तस्य तत्त्वार्थनिर्णयः येन कर्तुं ........ भवेत्, सः ........ इति ........ ।

(ग) य आत्मनः श्रेयः .......... सुखानि च इच्छति, परेभ्यः अहितं ...... कदापि च न .......... |

उत्तर: 3

(क) पुत्राय, तत् कृतज्ञता

(ख) केन, शक्यः, विवेकः, ईरितः

(ग) प्रभूतानि, कर्म, कुर्यात्।

4. अधोलिखितम् उदाहरणद्वयं पठित्वा अन्येषां प्रश्नानाम् उत्तराणि लिखत-

| **प्रश्नाः** | **उत्तराणि** |
| --- | --- |
| **क.** श्लोक संख्या-3 | |
| **यथा-** सत्या मधुरा च वाणी का? | **धर्मप्रदा** |
| (क) धर्मप्रदां वाचं कः त्यजति? | **विमूढधीः** |
| (ख) मूढः पुरुषः कां वाणीं वदति? | **पुरुषाम्** |
| (ग) मन्दमतिः कीदृशं फलं खादति? | **अपक्वम्** |
| **ख.** श्लोक संख्या-7 | |
| **यथा-** बुद्धिमान् नरः किम् इच्छति? | **आत्मनः श्रेयः** |
| (क) कियन्ति सुखानि इच्छति? | **प्रभूतानि** |
| (ख) सः कदापि किं न कुर्यात्? | **अहितं कर्म** |
| (ग) सः केभ्यः अहितं न कुर्यात्? | **परेभ्यः** |

5. मञ्जूषायाः तद्भावात्मकसूक्तीः विचित्य अधोलिखितकथनानां समक्षं लिखत-

www.ncertsolutionhub.in

**(क) विद्याधनं महत्**

1. विद्याधनं सर्वधनप्रधानम्।

2. विद्याधनं श्रेष्ठं तन्मूलमितरद्धनम्।

**(ख) आचारः प्रथमो धर्मः**

1. आचारेण तु संयुक्तः संपूर्णफलभाग्भवेत्।

2. आचारप्रभवो धर्मः सन्तश्चाचारलक्षणाः।

**(ग) चित्ते वाचि च अवक्रता एव समत्वम्**

1. मनसि एकं वचसि एकं कर्मणि एकं महात्मनाम्।

2. सं वो मनांसि जानताम्।

6. (अ) अधोलिखितानां शब्दानां पुरतः उचितं विलोमशब्दं कोष्ठकात् चित्वा लिखत-

(क) पक्वः **अपक्वः** (परिपक्वः, अपक्वः, क्वथितः)

(ख) विमूढधीः **सुधीः** (सुधीः, निधिः, मन्दधीः)

(ग) कातरः **अकातरः** (अकरुणः, अधीरः, अकातरः)

(घ) कृतज्ञता **कृतघ्नता** (कृपणता, कृतघ्नता, कातरता)

(ङ) आलस्यम् **उद्योगः** (उद्विग्नता, विलासिता, उद्योगः)

(च) परुषा **कोमला** (पौरुषी, कोमला, कठोरा)

6. (आ) अधोलिखितानां शब्दानां त्रयः समानार्थकाः शब्दाः मञ्जूषायाः चित्वा लिख्यन्ताम्-

उत्तर: (आ)

(क) प्रभूतम् = **भूरि, बहु, विपुलम्।**

(ख) श्रेयः = **शुभम्, शिवम्, कल्याणम्।**

(ग) चित्तम् = **मनः, चेतः, मानसम्।**

(घ) सभा = **संसद्, परिषद्, सभा।**

(ङ) चक्षुष् = **नेत्रम्, नयनम्, लोचनम्।**

www.ncertsolutionhub.in

(च) मुखम् = **आननम्, वदनम्, वक्त्रम्।**

7. अधस्ताद् समासविग्रहाः दीयन्ते तेषां समस्तानि पाठाधारेण दीयन्ताम्-

| ***विग्रहः*** | ***समस्तपदम्*** | ***समासनाम*** |
|---|---|---|
| (क) तत्वार्थस्य निर्णयः | तत्वार्थनिर्णयः | षष्ठी तत्पुरुषः |
| (ख) वाचि पटुः | वाक्पटुः | सप्तमी तत्पुरुषः |
| (ग) धर्मं प्रददाति इति (ताम्) | धर्मप्रदाम् | उपपदतत्पुरुषः |
| (घ) न कातरः | अकातरः | नञ् तत्पुरुषः |
| (ङ) न हितम् | अहितम् | नञ् तत्पुरुषः |
| (च) महान् आत्मा येषाम् | महात्मानः | बहुव्रीहिः |
| (छ) विमूढा धीः यस्य सः | धिमूढधीः | बहुव्रीहिः |

## योग्यताविस्तारः

**ग्रन्थपरिचयः** तिरुक्कुरल तमिल भाषा में लिखी गई तमिल साहित्य की एक उत्कृष्ट रचना है। इसके प्रणेता तिरुवल्लुवर हैं । ग्रन्थ का रचनाकाल ईस्वी संवत् की प्रथम शताब्दी है।

इस ग्रन्थ में सम्पूर्ण मानव जाति के लिए जीवनोपयोगी-सत्य प्रतिपादित हैं।

'तिरु' शब्द 'श्री' का वाचक है। इस प्रकार 'तिरुक्कुरल' पद का अभिप्राय है- 'श्री से युक्त कुरल छन्द या श्री से युक्त वाणी' । इस ग्रन्थ में धर्म, अर्थ तथा काम तीन भाग हैं। तीन भागों के श्लोकों की संख्या 1330 है ।

## भावविस्तारः

इस ग्रन्थ में विभिन्न विषयों से सम्बद्ध सूक्तियां प्राप्त होती हैं। जैसे–सदाचारः, मधुरा वाक्, विद्याधनम्, विद्वत्ता, आत्मकल्याणम् आदि।

www.ncertsolutionhub.in